# Shivaproktam Shivabhaktirphalopadesham 1

# શિવપ્રોક્તં શિવભક્તિર્ફલોપદેશમ્ ૧

## Document Information

Text title : Shivaproktam Shivabhaktirphalopadesham1

File name : shivabhaktirphalopadesham1shivaproktaM.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 13 | 553-573||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં શિવભક્તિર્ફલોપદેશમ્ ૧

શિવે સુરાણાં મર્ત્યાનાં મદ્ભક્તિર્મદનુગ્રહાત્ ।
ભવત્યનન્યયા ભક્ત્યા મામેવાભ્યુપયન્તિ તે ॥ ૫૫૩॥

યો મામવ્યાજભક્ત્યૈવ વિજ્ઞાયાભ્યર્ચયિષ્યતિ ।
તમહં સર્વદુઃખેભ્યો મોચયામિ શિવે ધ્રુવમ ॥ ૫૫૪॥

મલ્લિઙ્ગભક્તિરેવૈકા સંસારાર્ણવતારિણી ।
નાસ્તિ મદ્ભક્તિસદૃશં સંસારાર્ણવતારકમ્ ॥ ૫૫૫॥

મદ્ભક્તિયુક્તો મામીશં સર્વદેવગણાધિપમ્ ।
યઃ પૂજયતિ યત્નેન સ મોક્ષમધિગચ્છતિ ॥ ૫૫૬॥

તિષ્ઠન્નાસન્નટન્શમ્ભું યઃ સદા માં સ્મરિષ્યતિ ।
સ નિર્દગ્ધમહાપાપો મામુપૈષ્યત્યસંશયમ્ ॥ ૫૫૭॥

પુણ્યક્ષેત્રેષુ સર્વેષુ પુણ્યર્ક્ષેષ્વપિ સાદરમ્ ।
ક્ષીરાદ્યૈઃ સ્નાપયેદ્યો માં સ મોક્ષમધિગચ્છતિ ॥ ૫૫૮॥

ભસ્મના સ્નાપયેદ્યો માં શોધિતેન શિવે શિવમ્ ।
સ માં પ્રવિશ્ય સુભગે મત્સ્વરૂપો ભવિષ્યતિ ॥ ૫૫૯॥

સ્વાર્જિતૈર્બિલ્વપત્રૈર્માં યઃ પૂજયતિ ભક્તિતઃ ।
સ માં પ્રવિશ્ય સુભગે મત્સ્વરૂપો ભવિષ્યતિ ॥ ૫૬૦॥

રુદ્રાધ્યાયરતો ભૂત્વા યો મામન્નૈઃ પ્રતર્પયેત્ ।
સ માં પ્રવિશ્ય સુભગે મત્સ્વરૂપો ભવિષ્યતિ ॥ ૫૬૧॥

યો માં ગોઘૃતસંયુક્તૈર્દીપૈઃ સન્દીપયેન્મુદા ।
સ માં પ્રવિશ્ય સુભગે મત્સ્વરૂપો ભવિષ્યતિ ॥ ૫૬૨॥

યો માં પ્રદક્ષિણૈર્નિત્યં પ્રણામૈશ્ચાપિ તોષયેત્ ।
સ માં પ્રવિશ્ય સુભગે મત્સ્વરૂપો ભવિષ્યતિ ॥ ૫૬૩॥

યો ભસ્મધૂલિતો નિત્યં રુદ્રાધ્યાયં જપેન્મુદા ।
સ માં પ્રવિશ્ય સુભગે મત્સ્વરૂપો ભવિષ્યતિ ॥ ૫૬૪॥

યો ભસ્મધૂલિતો નિત્યં શૈવં પઞ્ચાક્ષરં જપેત્ ।
સ માં પ્રવિશ્ય સુભગે મત્સ્વરૂપો ભવિષ્યતિ ॥ ૫૬૫॥

યઃ પ્રીણયેત્સ્તોત્રપાઠૈર્નૃત્યૈશ્ચ કરતાલનૈઃ ।
સ માં પ્રવિશ્ય સુભગે મત્સ્વરૂપો ભવિષ્યતિ ॥ ૫૬૬॥

યો વાચયેન્મત્પ્રશંસાં સાનુમોદં મદાલયે ।
સ માં પ્રવિશ્ય સુભગે મત્સ્વરૂપો ભવિષ્યતિ ॥ ૫૬૭॥

યો મદ્ભક્તમતિપ્રીત્યા ભોજયેત્પાયસાદિભિઃ ।
સ માં પ્રવિશ્ય સુભગે મત્સ્વરૂપો ભવિષ્યતિ ॥ ૫૬૮॥

યો મદ્ભક્તાય ચ વસ્ત્રાણિ દત્વા સમ્પ્રીણયેન્મુદા ।
સ માં પ્રવિશ્ય સુભગે મત્સ્વરૂપો ભવિષ્યતિ ॥ ૫૬૯॥

યો મદ્ભક્તાય ચ રત્નાનિ દદ્યાત્સ્વર્ણં ચ સાદરમ્ ।
સ માં પ્રવિશ્ય સુભગે મત્સ્વરૂપો ભવિષ્યતિ ॥ ૫૭૦॥

યો મદ્ભક્તાય રુદ્રાક્ષાન્દદ્યાત્પ્રીતિપુરઃસરમ્ ।
સ માં પ્રવિશ્ય સુભગે મત્સ્વરૂપો ભવિષ્યતિ ॥ ૫૭૧॥

મદ્ભક્તાય ચ યો દદ્યાદ્રત્નલિઙ્ગાનિ સાદરમ્ ।
સ માં પ્રવિશ્ય સુભગે મત્સ્વરૂપો ભવિષ્યતિ ॥ ૫૭૨॥

એવં મત્કર્મનિરતા મમૈવાનુગ્રહાચ્છિવે ।
માં પ્રાપ્નુવન્તિ જ્વલને હવીષીવ ન સંશયઃ ॥ ૫૭૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં શિવભક્તિર્ફલોપદેશં ૧ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૩ । ૫૫૩-૫૭૩ ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 13 . 553-573 ..

Notes:

Śiva શિવ describes to Parvatī પાર્વતી, the merits of having Devotion and conducting Worship unto Him - especially that the one who does the same, becomes One with Him and becomes like Him. Some Śloka-s in this context are given on this webpage.

Encoded and proofread by Ruma Dewan

*Shivaproktam Shivabhaktirphalopadesham 1*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*